# Skandaproktam Vedarahasyakathanam

# સ્કન્દપ્રોક્તં વેદરહસ્યકથનમ્

## Document Information

Text title : Skandaproktam Vedarahasyakathanam

File name : vedarahasyakathanamskandaproktaM.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 47 - vedarahasyakathanam | 19.2-48||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# સ્કન્દપ્રોક્તં વેદરહસ્યકથનમ્

કાલકાલો મહાદેવઃ કાલાવચ્છેદવર્જિતઃ ॥ ૧૯॥

કાલાવચ્છેદયુક્તાનાં બ્રહ્મવિષ્ણુહરાત્મનામ્ ।
ઇન્દ્રાદીનામ્મુનીનાઞ્ચ ગ્રહાણાઞ્ચઋષેસ્તથા ॥ ૨૦॥

સપ્તર્ષિણાઞ્ચસિદ્ધાનાં પિતૃણાઞ્ચ સનાતનઃ ।
ભૂતાનાઞ્ચભવિષ્યાણાં સામ્પ્રતાનાઞ્ચ શઙ્કરઃ ॥ ૨૧॥

કરોતિસૃષ્ટિન્નાશઞ્ચસ્થિતિઙ્કાલસ્યકલ્પનામ્ ।
માયાભિર્મોહિતાનાઞ્ચ બ્રહ્મવિષ્ણુહરાત્મનામ્ ॥ ૨૨॥

શરીરાણિપ્રવિશ્યૈવકરોતીદઞ્ચરાચરમ્ ।
સ એવ સર્વભૂતાનાં પ્રાણાનાદાયોદેતિ ચ ॥ ૨૩॥

સ એવ સર્વભૂતાનાં પ્રાણાનાદાયાસ્તમેતિ ચ ।
સ્ત્ર્યન્નપાનોપભોગૈશ્ચ તત્તદ્દેહેષુ સર્વદા ॥ ૨૪॥

પરાં પ્રીતિં વિતનુતે જડેષ્વજડ ઈશ્વરઃ ।
સ એવ જાગ્રદાદ્યાસુ હ્યવસ્થાસ્વપિ શઙ્કરઃ ॥ ૨૫॥

અવસ્થારહિતશ્ચાયં સર્વેષ્વન્તર્ગતસ્થિતિઃ ।
સ એવ જાગ્રદ્ભૂતેષુ સ્વપિત્યેકો મહેશ્વરઃ ॥ ૨૬॥

સ એવાનન્દમૂર્તિર્હિ તસ્યાનન્દૈકલેશતઃ ।
પ્રિયાત્મકં જગજ્જાલં કુરુતે દુઃખદાયકમ્ ॥ ૨૭॥

અસત્યમેતચ્ચજડં સ્વસત્યાત્સત્યવત્સ્થિતઃ ।
કરોતિ ચ જડં સર્વં ચેતનાનાં સચેતનઃ ॥ ૨૮॥

અસઙ્ગોઽપિ સદા ભાતિ જગત્સ્વેતેષુ શઙ્કરઃ ।
સમવાનપિ વિશ્વેશશ્શિવસ્સર્વાન્તરઙ્ગતઃ ॥ ૨૯॥

(સઙ્ગવાનિવ વિશ્વેશોઽસઙ્ગસ્સર્વાન્તરઙ્ગકઃ) ॥ ૨૯॥

બુદ્ધેર્બોધયિતા મન્તા મનસશ્ચ ગતાગતિઃ ।
અપ્રાણઃ પ્રાણરૂપેણ હ્યાકાશાદપિ ચોત્તરઃ ॥ ૩૦॥

બ્રહ્મ બ્રહ્મમયો ભાતિ શિવ એવં સનાતનઃ ।
ન તસ્ય કરણં કાર્યં ન ક્રિયા પરમાર્થતઃ ॥ ૩૧॥

શીર્ણેષુ દેહજાલેષુ હ્યશીર્ણસ્સર્વદા સ્થિતઃ ।
વિકારભૂતે જગતિ નિર્વિકારતયા સ્થિતઃ ॥ ૩૨॥

ન નશ્યન્ન ચ સીદાનો શિવ એવ હિ કેવલઃ ।
(નસન્દૃશે રૂપમસ્ય શિવ એવેતિ કેવલઃ ।)
ગુહાહિતો નિરિચ્છોહિ સદા ભેદવિવર્જિતઃ ॥ ૩૩॥

કારણં કારણાનાઞ્ચ મહાન્હિ તમસઃ પરઃ ।
યસ્માદ્બ્રહ્મેન્દ્રવિષ્ણવાદ્યા રુદ્રાસ્સર્વે મરુદ્ગણાઃ ॥ ૩૪॥

સમ્પ્રસૂતા મહાદેવાન્ન તતોઽસ્ત્યધિકઃ પરઃ ।
યસ્ય નિશ્વસિતં વેદા નાનાશાખાવિભૂષિતાઃ ॥ ૩૫॥

યસ્ય જ્ઞાનેન સર્વેષાં મુક્તયસ્સર્વતો દ્વિજાઃ ।
સ સન્તરતિ સંસારમસારં ભયદાયકમ્ ॥ ૩૬॥

સરસોઽયં યદ્રસેન જગદ્રસમયં ભવેત્ ।
સ એવ જ્યોતિષાઞ્જયોતિસ્સ ચક્ષુસ્સ તપો મહત્ ॥ ૩૭॥

સ ભૂમા કેવલાનન્દસ્સ બોધઃ કેવલં શિવઃ ।
સ એવ સ્થૂલમનણૂ રુદ્રો વિશ્વાર્તિનાશકઃ ॥ ૩૮॥

નિરિન્દ્રિયશ્ચેન્દ્રિયાણાં ગતિશ્શાસ્તા મહેશ્વરઃ ।
નિરાભાસો નિરાસઙ્ગો વિશ્વભાસપ્રવર્તકઃ ॥ ૩૯॥

સર્વં તસ્મિન્મહાદેવે જગદ્બ્રહ્મણિ લીયતે ।
(સર્વં તસ્મિન્મહાદેવે જગદ્બ્રહ્મપિપીલિકમ્ ।)
વિભાતિ માયયા સાક્ષાત્તસ્મિન્ જ્ઞાને મુનીશ્વરાઃ ॥ ૪૦॥

સર્વં શિવતયા ભાતિ પ્રસાદેન મહેશિતુઃ ।
સ ષોડશાત્મા પુરુષો નેહ નાનાસ્તિ કિઞ્ચન ॥ ૪૧॥

વિકારમેતત્સર્વં હિ અવિકારે વિકારિતમ્ ।

તસ્યૈવ તપસા ધ્યાનાત્તલિઙ્ગાર્ચનતોદ્વિજ ॥ ૪૨॥

સર્વં શોકં તરત્યેવ નાત્રકાર્યા વિચારણા ।
ભિદ્યન્તે ગ્રન્થયસ્સર્વા એકત્વેનાનુપશ્યતઃ ॥ ૪૩॥

તમાત્માનં મહાદેવં વિશ્વાકારતયા સ્થિતમ્ ।
વહ્નિર્વાયુર્જલં ક્ષ્મા ચ વિદ્યતે તન્મહેશ્વરઃ ॥ ૪૪॥

(વહ્નિર્વાયુર્જલં ક્ષ્મા ચ વિયદેતન્મહેશ્વરઃ) ॥ ૪૪॥

એતેષામાનુલોમ્યેન પ્રાતિલોમ્યેન સૃષ્ટયઃ ।
સઞ્જાતા અત્ર લીનાશ્ચ તસ્મિન્નેવ મહેશ્વરે ॥ ૪૫॥

તસ્માદ્ભૂતાનિ જાતાનિ તત્ર જીવન્તિ તાન્યપિ ।
તસ્મિન્નેત્રવલયંયાન્તિ ઈશસંસ્થઞ્ચરાચરમ્ ॥ ૪૬॥

ઈશાવાસ્યમિદં સર્વં તસ્મિન્ત્સર્વં પ્રવર્તતે ।
(ઈશાવાસ્યમિદં દૃશ્યં યસ્મિન્સર્વં પ્રવર્તતે ।)
એવં યો વેદવેદાન્તૈઃ પ્રસાદાત્પરમેશ્વરાત્ ॥ ૪૭॥

ગુરોશ્ચ (ગુરૂક્ત્ય) શ્રદ્ધયા ચૈવ સર્વજ્ઞસ્સ ચ શામ્ભવઃ ।
સમુનિસ્સશિવશ્ચાપિ સ શિવજ્ઞાનવિત્તમઃ ॥ ૪૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે સ્કન્દપ્રોક્તં વેદરહસ્યકથનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૪૭ - વેદરહસ્યકથનમ્ । ૧૯.૨-૪૮॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 47 - vedarahasyakathanam . 19.2-48..

Notes:
Skanda સ્કન્દ narrates the Essence of Śivatattva શિવતત્ત્વ as in the Mystery of Veda-s (Vedarahasyam વેદરહસ્યમ્), that was enunciated by Mahādeva મહાદેવ to Devī દેવી.

Encoded and proofread by Ruma Dewan

*Skandaproktam Vedarahasyakathanam*

pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*